Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 7

**SS–12–Sanskrit Sah.**

यहाँ से काटिए

# उच्च माध्यमिक परीक्षा, 2019

## SENIOR SECONDARY EXAMINATION, 2019

## संस्कृत साहित्यम्

**समय** : 3¼ **(सपाद होरात्रयम्)**

**पूर्णाङ्क** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) **परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।**

2) **सर्वे प्रश्नाः अनिवार्याः ।**

3) **प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।**

4) **प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।**

यहाँ से काटिए

1) अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

विषादप्यमृतं ग्राह्यं, बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ।।

क) विषाद् किं ग्राह्यम्? (एक पदेन उत्तरम्) [1]

ख) सुभाषितं कस्मात् ग्रहणीयम्? (पूर्ण वाक्येन उत्तरम्) [1]

ग) 'स्वर्णम्' इत्यस्य पर्यायं चिनुत । [1]

घ) 'मित्रम्' इत्यस्य विलोमपदं चिनुत । [1]

2) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

स्वभावतः एव मानवाः सर्वत्र विजयं कामयन्ते, । किन्तु विचारणीयोऽयं विचारो यत् कामनामात्रेण किं कश्चन स्वकर्मणि प्रयत्नं विना साफल्यं लभते? शक्तिद्वारैव सर्वं कर्तुं शक्यते । माताऽपि तनयं रोदनं विना न स्तन्यं पाययति । जगति यो यावान् शक्तिमान् भवति स तावानेव समुन्नतेः शिखरमारोहति ।

क) के स्वभावतः एव विजयं कामयन्ते? (एक पदेन उत्तरम्) [1]

ख) केन सर्वं कर्तुं शक्यते? (पूर्ण वाक्येन उत्तरम्) [1]

ग) 'माताऽपि तनयं रोदनं विना न स्तन्यं पाययति' । इत्यत्र 'पाययति' इति क्रियायाः कर्ता कः? [1]

घ) 'यावान् शक्तिमान्' इत्यत्र विशेषणपदं किम्? [1]

3) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

सीता – यद् भवतु तद् भवतु । यथा भगवत्याज्ञापयति । (ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः सोह्लादोच्छ्वासो रामः)

सीता – जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य ।

रामः – हन्त भोः, कमेतत्?

स्पर्शः पुरा परिचितो नियतं स एव,
सञ्जीवनश्च मनसः परितोषणश्च ।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा –
मानन्दनेन जड़तां पुनरातनोति ।।

क) भूम्यां निपतितः सोह्लादोच्छ्वासो कः प्रविशति? (एक पदेन उत्तरम्) [1]

ख) पुनः कस्य जीवितं प्रत्यागतम्? (पूर्ण वाक्येन उत्तरम्) [1]

ग) 'शीघ्रम्' इत्यस्य पर्यायपदं किम्? [1]

घ) 'परिचितः स्पर्शः' इत्यत्र विशेष्यपदं किम्? [1]

4) रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरुत – [3×1=3]

क) अपरिणामोपशमो दारुणो लक्ष्मीमदः ।

ख) चारुदत्तस्य मैत्रेयेण सह संवादः भवति ।

ग) संस्कृत साहित्ये 'बृहत्त्रयी' इति नाम्ना त्रीणि महाकाव्यानि सन्ति ।

5) निम्नलिखित वाक्ययोः भावार्थः हिन्दीभाषया संस्कृतेन वा लिखत – [2×2=4]

क) अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।

ख) स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।

6) अधोलिखितस्य श्लोकस्य अन्वयसहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत – [1½+1½=3]

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा ।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी त्रणात् ।।

7) निम्नलिखित शब्दयोः हिन्दीभाषायां आंग्लभाषायां वा अर्थं लिखत – [2]

क) उपासते

ख) अपरम्

8) 'भाग्यक्रमेण हि धनानि भवन्ति ।' इत्यत्र भवन्ति इति क्रियायाः कर्ता कः ? [1]

9) 'सा विरहिणी हिमालयस्थितायां अल्कापुर्यां निवसति' । इत्यत्र हिमालयस्थितायां इति पदस्य विशेष्यं लिखत । [1]

10) 'अहं समाधिं निवर्तयामि' इत्यत्र अहं सर्वनामस्थाने संज्ञापदस्य प्रयोगं कुरुत । [1]

11) 'अधुना वृद्धाश्रमे एव मातरं प्रापच्य निश्चिन्ततायाः अनुभवः क्रियेत्' । इति वाक्यं कः कस्मै कथयति? [1]

12) 'न हिंसनं भवेत् क्वचित्' इत्यत्र रेखाङ्कितपदस्य विलोमपदं लिखत । [1]

13) नाहम् अन्येन हतं सत्वं कदाचिदपि भक्षयामि । इत्यत्र अहम् इति कर्तृपदस्य क्रियापदं लिखत । [1]

14) वेदाङ्गेषु केषाञ्चित् त्रयाणां संक्षिप्तपरिचयं लिखत । [3]

15) कस्मिन् नाटके स्त्रीपात्राणां पूर्णतया अभावः? कति अङ्केषु विभक्तमिदं नाटकम्? [2]

16) कादम्बर्यां निबद्धा कथा कस्मात् ग्रन्थात् गृहीता ? शुकनासः कः आसीत्? [2]

17) निम्नलिखित–प्रश्नानां संक्षिप्तम् उत्तरं लिखत– [3×1=3]

क) संस्कृतस्य प्रथमः ऐतिहासिकः उपन्यासः कः?

ख) 'ईश्वरविलासः' इति महाकाव्यस्य रचनाकारः कः?

ग) पं. गिरिधरशर्मणा रचितायाः कस्याश्चित् कथायाः नाम लिखत।

18) अधोलिखितेषु कस्यापि एकस्य छन्दसः लक्षणोदाहरणे लिखत– [3]

क) शालिनी

ख) द्रुतविलम्बितम्

ग) स्रग्धरा

19) अधोलिखितयोः पंद्यांशयोः कस्यचिदेकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत – [1+1=2]

क) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

ख) मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।

20) अधोलिखितेषु कस्यचिदेकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत– [3]

क) श्लेषः

ख) विभावना

ग) उत्प्रेक्षा

21) अधोलिखितयोः पद्यांशयोः प्रयुक्त कस्यचिदेकस्य अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत – [1+1=2]

क) धनिनोऽपि निरुन्मादाः।

ख) संसार विषवृक्षस्य द्वे एव रसवत् फले।

22) अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत –

करौलीमण्डलस्य अन्तर्गते हिण्डौननामकनगर निकटे श्रीमहावीरजी नामके ग्रामेऽस्याः मेलायाः आयोजनं भवति। इयमपि धार्मिकमेला वर्तते। भगवान् महावीरो जैन धर्मस्य चतुर्विंशतितमः तीर्थंकरो विद्यते। श्री महावीरक्षत्रे भगवतो महावीरस्य पाषाणमयी प्राचीनप्रतिमा, तत्रत्य गंभीरीनदीगर्भात् निःसृता विराजते । अस्यां मेलायां जैन धर्मावलम्बिनां साधूनां समवायोऽपि भवति। जैनेतराः गुर्जरमीणादि – जातीयकाः जनाः अपिश्रद्धया मेलायां संगताः भवन्ति।

क) जैनधर्मस्य चतुर्विंशतितमः तीर्थंकर कः अस्ति? (एक पदेन उत्तरम्) [1]

ख) अस्यां केषां समवायो भवति? (पूर्ण वाक्येन उत्तरम्) [1]

ग) 'प्राचीन प्रतिमा' इत्यत्र विशेषणपदं किम्? [1]

घ) 'जनाः अपि श्रद्धया मेलायां संगताः भवन्ति?' इत्यत्र कर्तृपदं किम्? [1]

23) अधोलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानामुत्तराणि लिखत –

अनेन ज्ञायते यत् श्रद्धया विनयेन श्रेयसाम् अभिवादनेन च नरः सर्वत्र सिद्धिं समधिगच्छति । हन्त ! अन्धानुकरणशीलेऽस्मिन् युगे शनैः शनैः सद्गुणास्तु अस्माभिरुपेक्ष्यन्ते । बालकाः विद्यालयेषु प्रथमदर्शने 'हाय' इति शब्देन परस्परम् अभिवादयन्ति, श्रेष्ठानां ज्येष्ठानां च चरणवन्दना तु दूरे जाता, साम्प्रतं परिवारेषु सद्गुणानां संरक्षणं शिक्षणम् आवश्यकम् अस्ति।

क) अन्धानुकरणशीले अस्मिन् युगे के उपेक्ष्यन्ते? (एक पदेन उत्तरम्) [1]

ख) नरः केन सर्वत्र सिद्धिं समधिगच्छति? (पूर्ण वाक्येन उत्तरम्) [1]

ग) 'बालकाः विद्यालयेषु ............. अभिवादयन्ति।' इत्यत्र क्रियापदं किम्? [1]

घ) साम्प्रतं केषु सद्गुणानां संरक्षणं शिक्षणम् आवश्यकम्? [1]

24) प्रदत्तशब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत – [5]
सज्जनानां संगतिः, सत्संगतिः, यादृशैः सह तादृशः, सम्पर्केण जनः, सज्जनः, उन्नतिं प्राप्नोति, महत्प्रभावः दुर्जन संगतिः हेया, विद्या कीर्तिश्च वर्धते, करणीया

अथवा

क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत –

क) सिंहः कूपे अपतत् मृतश्च ।

ख) सः बलात् सर्वान् पशून् हन्ति ।

ग) सिंहः चिन्तयति – कूपे अपरसिंहः अवश्यमेव वर्तते ।

घ) वने एकः सिंहः प्रतिवसति स्म ।

ङ) शशकः सिंह कूपे नयति ।

च) पशवः मिलित्वा प्रतिदिनम् एकैकमृगस्य क्रमः निर्धारितवन्तः ।

छ) शशकः वदति –मार्गे अपरः सिंहः मिलति ।

ज) सिंहः कूपमध्ये आत्मनः प्रतिबिम्बं पश्यति ।

झ) सिंहः कोपाविष्टः भवति ।

ञ) सिंहः समयातिक्रमेण बुभुक्षितः

25) अधोलिखितवाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृत भाषायाम् अनुवादं कुरुत – [5×1=5]

क) मैं असत्य नहीं बोलता हूँ ।

ख) छात्र विद्यालय में खेलते हैं ।

ग) तुझे सदा सत्य बोलना चाहिये ।

घ) विद्यालय के चारों ओर वृक्ष हैं ।

ङ) लता और रमेश पुस्तक पढें ।

च) वह कल जयपुर गया ।

छ) वे दोनों कक्षा में नही हंसेगे ।

ज) राजा के साथ सेनापति चला ।

**26)** अधोलिखित पदयोः सूत्रोल्लेखपूर्वकं सन्धि विच्छेदं कुरूत – **[1+1=2]**

क) पावकः

ख) विष्णोऽव

**27)** अधोलिखित पदयोः सूत्रोल्लेख पूर्वकं सन्धिं कुरूत– **[1+1=2]**

क) होतृ + ऋकारः

ख) गगन + ऊर्ध्वम्

**28)** निम्नलिखितेषु रेखाङ्कितपदेषु प्रयुक्त विभक्तेः नाम उल्लिख्य विधायकसूत्रं लिखत – **[4×1=4]**

क) सुरेशः शय्याम् अधिशेते ।

ख) जटाभिः तापसः प्रतीयते ।

ग) अन्नस्य हेतोः वसति ।

घ) कटे आस्ते ।

**29)** अधोलिखित पदयोः प्रयुक्त समासस्य नाम उल्लिख्य विग्रहं कुरुत – **[1+1=2]**

क) अनुरूपम्

ख) कुपुरुषः

**30)** अधोलिखित विग्रह वाक्ययोः समासं कृत्वा नामापि लिखत – **[1+1=2]**

क) चोराद् भयम्

ख) दश आननानि यस्य सः

⊖⊖⊖

DO NOT WRITE ANYTHING HERE